# ॥ શ્રીયમુના કવચમ્ ॥

.. Shri Yamuna Kavacham ..

sanskritdocuments.org

September 11, 2017

# .. Shri Yamuna Kavacham ..

## ॥ શ્રીયમુના કવચમ્ ॥

## Sanskrit Document Information

Text title : shrIyamunA kavachaM from Gargasamhita

File name : yamunAkavachaMgargasamhitA.itx

Category : kavacha, devii, nadI

Location : doc_devii

Transliterated by : Vishwas Bhide vrbhide at rediffmail.com

Proofread by : Vishwas Bhide, PSA Easwaran psaeaswaran at gmail.com

Description-comments : gargasamhitA

Acknowledge-Permission: Vishwas Bhide http://satsangdhara.net/

Latest update : February 3, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

ગર્ગસંહિતાન્તર્ગતં

માન્ધાતોવાચ -
યમુનાયાઃ કૃષ્ણરાજ્ઞ્યાઃ કવચં સર્વતોઽમલમ્ ।
દેહિ મહ્યં મહાભાગ ધારયિષ્યામ્યહં સદા ॥ ૧॥

સૌભરિરુવાચ -
યમુનાયાશ્ચ કવચં સર્વરક્ષાકરં નૃણામ્ ।
ચતુષ્પદાર્થદં સાક્ષાચ્છૃણુ રાજન્મહામતે ॥ ૨॥

કૃષ્ણાં ચતુર્ભુજાં શ્યામાં પુણ્ડરીકદલેક્ષણામ્ ।
રથસ્થાં સુન્દરીં ધ્યાત્વા ધારયેત્કવચં તતઃ ॥ ૩॥

સ્નાતઃ પૂર્વમુખો મૌની કૃતસન્ધ્યઃ કુશાસને ।
કુશૈર્બદ્ધશિખો વિપ્રઃ પઠેદ્વૈ સ્વસ્તિકાસનઃ ॥ ૪॥

યમુના મે શિરઃ પાતુ કૃષ્ણા નેત્રદ્વયં સદા ।
શ્યામા ભ્રૂભઙ્ગદેશં ચ નાસિકાં નાકવાસિની ॥ ૫॥

કપોલૌ પાતુ મે સાક્ષાત્પરમાનન્દરૂપિણી ।
કૃષ્ણવામાંસસમ્ભૂતા પાતુ કર્ણદ્વયં મમ ॥ ૬॥

અધરૌ પાતુ કાલિન્દી ચિબુકં સૂર્યકન્યકા ।
યમસ્વસા કન્ધરાં ચ હૃદયં મે મહાનદી ॥ ૭॥

કૃષ્ણપ્રિયા પાતુ પૃષ્ઠં તટિનિ મે ભુજદ્વયમ્ ।
શ્રોણીતટં ચ સુશ્રોણી કટિં મે ચારુદર્શના ॥ ૮॥

ઊરુદ્વયં તુ રમ્ભોરુર્જાનુની ત્વઙ્ઘ્રિભેદિની ।
ગુલ્ફૌ રાસેશ્વરી પાતુ પાદૌ પાપપ્રહારિણી ॥ ૯॥

અન્તર્બહિરધશ્ચોર્ધ્વં દિશાસુ વિદિશાસુ ચ ।
સમન્તાત્પાતુ જગતઃ પરિપૂર્ણતમપ્રિયા ॥ ૧૦॥

ઇદં શ્રીયમુનાયાશ્ચ કવચં પરમાદ્ભુતમ્ ।
દશવારં પઠેદ્ભક્ત્યા નિર્ધનો ધનવાન્ભવેત્ ॥ ૧૧॥

ત્રિભિર્માસૈઃ પઠેદ્ધીમાન્ બ્રહ્મચારી મિતાશનઃ ।
સર્વરાજ્યાધિપત્યઞ્ચ પ્રાપ્યતે નાત્ર સંશયઃ ॥ ૧૨॥

દશોત્તરશતં નિત્યં ત્રિમાસાવધિ ભક્તિતઃ ।
યઃ પઠેત્પ્રયતો ભૂત્વા તસ્ય કિં કિં ન જાયતે ॥ ૧૩॥

યઃ પઠેત્પ્રાતરુત્થાય સર્વતીર્થફલં લભેત્ ।
અન્તે વ્રજેત્પરં ધામ ગોલોકં યોગિદુર્લભમ્ ॥ ૧૪॥

ઇતિ ગર્ગસંહિતાયાં માધુર્યખણ્ડે ષોડશાધ્યાયાન્તર્ગતં
યમુના કવચં સમ્પૂર્ણમ્ ।

Garga Samhita, Madhuryakhanda, Adhaya 16
Encoded by Vishwas Bhide vrbhide at rediffmail.com http://satsangdhara.net/
Proofread by PSA Easwaran psaeaswaran at gmail.com

.. Shri Yamuna Kavacham ..

Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996
on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*